# Bhavya-Bhuvanam Bharatam

# ભવ્ય-ભુવનં ભારતમ્ (માતૃગીતિકા)

## Document Information

Text title : Bhavya Bhuvanam Bharatam (Matrigitika)

File name : bhavyabhuvanaMbhAratam.itx

Category : misc, sanskritgeet, hkmeher

Location : doc_z_misc_general

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Matrigitikanjali

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : October 22, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 22, 2023

*sanskritdocuments.org*

# ભવ્ય-ભુવનં ભારતમ્ (માતૃગીતિકા)

જયતુ જનની જન્મ-ભૂમી
ભવ્ય-ભુવનં ભારતમ્,
વિજયતાં નો વન્દનીયં
સુન્દરં ધામામૃતમ્,
ભવ્ય-ભુવનં ભારતમ્ ॥ (ધ્રુવમ્) ॥

ધરિત્રીયં શ્યામલા,
કામધેનુઃ કોમલા ।
રત્ન-ગર્ભા શાશ્વતી,
કલ્પ-વલ્લી ભાસ્વતી ।
વિન્ધ્ય-ભૂષા સિન્ધુ-રશના હિમગિરિ-શિખા શર્મદા,
રમ્ય-ગઙ્ગા-સઙ્ગ-યમુના મહાનદીહ નર્મદા ।
કર્મ-તપસાં સાર્થ-તીર્થં પ્રકૃતિ-વિભવાલઙ્કૃતમ્,
વિજયતાં નો વન્દનીયં સુન્દરં ધામામૃતમ્ ।
ભવ્ય-ભુવનં ભારતમ્ ॥ ૧॥

બિભર્ત્તિ ભૂતિ-સમ્પદમ્,
રાષ્ટ્રમિદં હિ શં-પદમ્ ।
વૈરિ-લોચન-બાષ્પદમ્,
સત્કલાયા આસ્પદમ્ ।
સાંસ્કૃતિક્યા એકતાયાઃ પુઞ્જિતા સઞ્જીવની,
મઙ્ગલમયી રઙ્ગ-લલિતા નિખિલ-સુખદા લેખની ।
પ્રેમ-જગતાં જૈત્ર-ગીતં વિબુધ-હૃદયે ઝઙ્કૃતમ્,
વિજયતાં નો વન્દનીયં સુન્દરં ધામામૃતમ્ ।
ભવ્ય-ભુવનં ભારતમ્ ॥ ૨॥

સાભ્યુદયતા-દ્યોતિની,

સદાચાર-વિવર્દ્ધિની ।
લભ્યતે સા સભ્યતા,
ભાતિ દિવ્યા નવ્યતા ।
ચતુર્વર્ગદ-શાસ્ત્ર-માર્ગા યત્ર વિદ્યા વિદ્યતે,
વિશ્વ-મધ્યે યદધ્યાત્મં તત્ત્વ-સારં કીર્ત્યતે ।
ભારતીયે મૂલ-મન્ત્રે જયતિ સત્યં નાનૃતમ્,
વિજયતાં નો વન્દનીયં સુન્દરં ધામામૃતમ્ ।
ભવ્ય-ભુવનં ભારતમ્ ॥ ૩॥

ભૂમિરિયં સુચર્ચિતા,
ધીર-વીરૈરર્ચિતા ।
પ્રાચ્ય-પરિચય-ગૌરવા,
શુભા પ્રતિભા-વૈભવા ।
યત્ર ભાષા-વેષ-ભૂષા-રીતિ-ચલનૈ-ર્વિવિધતા,
તથાપ્યેકા દીપ્યમાના રાજતે જાતીયતા ।
એક-માતુઃ સુતાઃ સર્વે ભ્રાતૃ-સામ્યં સત્કૃતમ્,
વિજયતાં નો વન્દનીયં સુન્દરં ધામામૃતમ્ ।
ભવ્ય-ભુવનં ભારતમ્ ॥ ૪॥

સ્વાર્જિતૈરૂર્જસ્વલમ્,
જ્ઞાન-દીપૈરુજ્જ્વલમ્ ।
શાન્ત્યહિંસા-સદ્બલમ્,
ત્યાગ-સેવા-પુષ્કલમ્ ।
યત્ ત્રિરઙ્ગં ધ્વજં વિદધદ્ વર્ષમાર્ષં પૂજ્યતે,
લોકતન્ત્રં સાર્વભૌમં સ્વીય-ભૂમ્ના માન્યતે ।
ઐક્ય-મૈત્રી-ભાવ-સૂત્રં પરમ્પરયા સમ્ભૃતમ્,
વિજયતાં નો વન્દનીયં સુન્દરં ધામામૃતમ્ ।
ભવ્ય-ભુવનં ભારતમ્ ॥ ૫॥

યદ્ “વસુધા કુટુમ્બકમ્”,
નિગદિતં દિગ્દર્શકમ્ ।
અમ્બર-ચુમ્બિ-ચુમ્બકમ્,
સકલ-માનસ-કર્ષકમ્ ।
માનવિકતા-માનયિત્રી યત્ર વાગવિનશ્વરા,

સ્વર્ણ-વર્ણા પ્રીતિ-પૂર્ણા મહામહિમા સુસ્વરા ।
વિશ્વ-બન્ધો-ર્મધુર-ગન્ધં યશો યસ્મિન્ વિસ્તૃતમ્,
વિજયતાં નો વન્દનીયં સુન્દરં ધામામૃતમ્ ।
ભવ્ય-ભુવનં ભારતમ્ ।
ભારતમ્, ભારતમ્, ભારતમ્ ॥ ૬॥

– ગીતિ-રચના: ડૉ હરેકૃષ્ણ-મેહેરઃ
(માતૃગીતિકાઞ્જલિઃ-કાવ્યતઃ)

(Composed in self-innovated original new lyrical maatraa-metre, which has been named ‘BhavyA’)

Copyright Dr.Harekrishna Meher

*Bhavya-Bhuvanam Bharatam*
pdf was typeset on October 22, 2023

Please send corrections to *sanskrit@cheerful.com*